वपुःप्रकर्षं बलमिन्द्रियाणाम्। स्त्रीषु प्रहर्षं परमग्निवृद्धिं वर्णप्रसादं पवनानुलोम्यम्। रसायनस्यास्य नरः प्रयोगाल्लभेत जीर्णोऽपि कुटीप्रवेशात्। जराकृतं पूर्वमपास्य रूपं बिभर्त्ति रूपं नवयौवनानाम्। सिता मतस्यचिड्काऽलाभे धात्र्याश्च स्वद भर्जनम्। चतुर्भागजले प्रायो द्रव्यं गतरसं भवेत्।"

**च्यवान** पु० च्यवन+पृषो० दीर्घः। च्यवनर्षौ "प्रमुञ्चन्तं द्रापिमिव च्यवानात्" ऋ०१।११६।१०। "च्यवानात् च्यवनाद्दषेः" भा० "युवं च्यवानमश्विना जरन्तं पुनर्युवानं चक्रथुः शचीभिः" ऋ०१।११७।१३। "हे अश्विनौ युवं युवां शचीभिरात्मीयैर्भैषज्यलक्षणैः कर्मभिः जरन्तं जीर्य्यन्तं च्यवानमेतत्संज्ञमृषिं युवानं पुनर्यौवनोपेतं चक्रथुः" भा० "च्यवानऋषिर्भवति स्तोतारां च्यवानमित्यस्य निगमा भवन्ति" इति निरु० ४।१९

**च्यावन** त्रि० च्यु–णिच्–ल्यु। च्युतिकारके "दुश्च्यावच्यावनो जेता हन्ता ब्रह्मद्विषां हरः" भा० कर्ण० ३४अ०। भावे ल्युट्। २च्युतिसम्पादने "यददं च्यावनं स्थानात् प्रतिष्ठाश्च शतक्रतोः" हरिवं० २८ अ०।

**च्यु** गतौ भ्वा० आत्म० सक० अनिट्। च्यवते अच्योष्ट। चुच्युवे। च्युतः। च्युतिः "यस्तु न च्यवते नित्यम् यशसा वर्चसा श्रिया" भा०व० २१८ अ०। "अद्य ते कतिचिद्रात्रयश्च्युतस्यार्य्यकवेश्मनः" रा० अयो० ७२।५। "न च्यवेयं स्वधर्म्मात्" भा०व० २८६ अ०। "अच्योष्ट सत्वान्नृपतिश्च्युताशः" "च्युताशनायाः फलवद्विभूत्या" भट्टिः उपसर्गपूर्वकस्य तत्तदुपसर्गद्योतार्थयुक्तगतौ।

**च्यु** सहने सक० हसने अक० चु० उभ० सेट्। च्यावयति अचि(चु)च्यवत् त। चु(चि)च्यावयिषति

**च्युत** क्षरणे भ्वा० पर० अक० सेट्। च्योतति इरित् अच्युत अच्योतीत्। चुच्योत। च्युतः। "इदं शोणित मभ्यग्रं संप्रहारेऽच्युततयोः" इदं कवचमच्योतीत्" इति च भट्टिः। [च्युतः। च्युतोपलः।

**च्युत** त्रि० च्यु–क्त च्युत–क वा। १गते २क्षरिते च। अ-

**च्युति** स्त्री च्यु–भावे क्तिन्। १गतौ "स्थानात् च्युतिः क्षत्रियस्य न धर्मेषु प्रशस्यते" भा० आ०१०३अ०। "कुर्य्यां हरस्यापि पिनाकपाणेर्धैर्य्यच्युतिं के मम धन्विनोऽन्ये" कुमा०। च्यु भावे क्तिन्। २क्षरणे। मदच्युतिः। च्योतति शोणितमस्मात् अपादाने क्ति। ४गुदद्वारे शब्दार्थचि०।

**च्युप** पु० च्यवन्ते भाषन्तेऽनेन धातूनामनेकार्थत्वात् च्यु–भाषणे प किच्च। वक्त्रे उज्ज्व०। पान्तादुपधत्वात् पुंस्त्वम्।

**च्युस** हानौ हसने चु० उभ० अक० सेट्। च्योसयति ते अचुच्युसत् त।

**च्यूत** पु० चूत+पृषो०। आम्रवृक्षे शब्दर० पाठान्तरम्।

**च्यौत्न** न० च्यु–गतौ करणे त्नण्। १बले निघ०। कर्त्तरि त्नण्। २गन्तरि २अगुड़े-२क्षीणपुण्यजने" सि०कौ०।

## इति वाचस्पत्ये चकारादिशब्दार्थनिरूपणम्।

---

## २९९७पृ० चयशब्दपरिशिष्टम्।

भावप्र० उक्ते दोषवृद्धादौ "कालस्वभावोऽयमाहारादिवशात् पुनः। चयादीन् यान्ति सद्योऽपि दोषाः काले विशेषतः। चयकोपशमाः पूर्व्वाह्णे वसन्तस्य लिङ्गं, मध्याह्ने ग्रीष्मस्य, अपराह्णे प्रावृषः, प्रदोषे वार्षिकस्य शरदमर्द्धरात्रे प्रत्यूषसि हेमन्तमुपलक्षयेत्। एवमहोरात्रमपि वर्षमिव शीतोष्णवर्षादोषोपचयप्रकोपोपशमान् जानीयादिति। सुश्रुतः। चयकोपशमा दोषा विहाराहारसेवनैः। समानैर्य्यान्त्यकालेऽपि विपरीते विपर्य्ययम्। समानैः तुल्यैः चयादियोग्यैरिति यावत्। विपर्य्ययं कालेऽपि वैपरीत्यं बोध्यम्। चयलक्षणमाह सुश्रुतः। स्वस्थानस्थस्य दोषस्य वृद्धिः स्यात्क्षाम कोष्ठता। पीतावभासता वह्निमन्दता चाङ्गगौरवम्। आलस्यञ्चयहेतौ तु द्वेषश्च चयलक्षणम्। सञ्चयोपहता दोषा लभन्ते नोत्तरां गतिम्। ते तूत्तरासु गतिषु भवन्ति बलवत्तराः"।